# Akshara Ramayanam

# અક્ષરરામાયણમ્

## Document Information

Text title : akSharArAmAyaNam

File name : akSharArAmAyaNam.itx

Category : raama

Location : doc_raama

Author : jAnaki

Proofread by : Surya Maruvada

Translated by : Surya Maruvada

Latest update : May 30, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 16, 2020

*sanskritdocuments.org*

# અક્ષરરામાયણમ્

બાલિદ્વીપલબ્ધં પ્રાચીનં અક્ષરરામાયણં
કવિજાનકીયં

## મુખવાણી

ભારતવર્ષસ્ય પ્રાચીનેષુ ઉપદ્વીપેષુ ઇદાનીં ઇણ્ડોનેષ્યાખ્યેષુ બાલિદ્વીપઃ "બલિદ્વીપ" ઇતિ પૂર્વં પ્રસિદ્ધ આસીત્ । તત્ર પ્રાયઃ સાર્ધસહસ્રવર્ષેભ્યઃ પૂર્વં કર્ણાટરાજસ્ય શ્રીધર્મસ્ય આધિપત્યં આસીત્ ઇતિ જ્ઞાયતે । કિઞ્ચ શૈવ-વૈષ્ણવ-શાક્ત-બૌદ્ધાદીનાં સંસ્કૃતભાષાત્મકઃ વ્યવહારઃ અત્યન્તં ઉત્તમઃ આસીત્ ઇતિ ચ પ્રચીનતાળપત્ર- પાણ્ડુલિપિપત્ર-ખણ્ડાદિભિઃ જ્ઞાયતે । બરોડામહારાજેન ગાયકવાડેન સ્વકીયપુસ્તકભાણ્ડાગારાત્ પ્રાચીનાઃ ખણ્ડત્રુટિતાઃ શ્લોકાઃ ટિપ્પન્યશ્ચ "બાલિદ્વીપગ્રન્થાઃ" ઇતિ સઙ્ગ્રાહ્ય પ્રકાશિતાઃ સન્તિ । તેષુ "કવિજાનકી" ઇતિ નામ્ના સ્થિતાઃ ખણ્ડાઃ ત્રુટિતાશ્ચ સાવધાનં પરિષ્કૃત્ય, "અક્ષરરામાયણમ્" ઇતિ નામ્ના અત્ર પ્રકાશ્યન્તે । અત્ર ઓં શ્રીપૂર્વકૈઃ પઞ્ચાશદ્વર્ણમાલાક્ષરૈઃ આરબ્ધૈઃ શ્લોકૈઃ રામાયણકથાસઙ્ગ્રહોऽપિ બાલાનાં અત્યન્તં ઉપયોગાય ભવતિ । લૢ લૣ ઙ ઞ ટ ઠ ઢ ણ અક્ષરાણાં લિપિસુન્દરાણાં ઉપમાનાનાં નિરૂપણેન, "અં અઃ" ઇત્યાદીનાં ફલિતવર્ણરૂપેણ ઉકારસ્ય હ્રસ્વ-દીર્ઘ-પ્લુત-સંવાદેન લકારત્રયપ્રયોગેણ ચ ઉપયોગચમત્કારઃ રમણીયોऽસ્તિ । કવિશ્ચ જાનકીનામ્ની રાજસમ્બધિની પણ્ડિતા ચ ઇતિ જ્ઞાયતે । ખણ્ડત્રુટિતાનાં સંયોજનેન કવેરભિપ્રાયાનુસારેણ પરિષ્કારેણ ચ "અક્ષરરામાયણં" ઇદં સમ્પાદિતં સંસ્કૃતશિક્ષાભ્યાસપરાણાં સર્વેષાં પ્રમોદાય ભવતિ । દ્વીપાન્તસંસ્કૃતભાષાવિજ્ઞાનસંશોધકાનાં ચ ઉપયોગાય ભવતિ ।

સમ્ભગ્નસન્ધાનકલા પ્રશસ્તા પ્રત્યાયની ચાપિ વિનષ્ટકાનામ્ ।
પ્રચીનભાવાનુવિવર્તની સા કાવ્યેષુ ભાવ્યા સુધિયાં મહિમ્ના ॥

અરૈયર્ શ્રીરામશર્મા રામાનુજદાસાનુદાસઃ
૨૪-૨-૧૯૯૬

## બાલિદ્વીપપ્રસિદ્ધં અક્ષરરામાયણમ્

કવિઃ - જાનકી

ૐ રામલક્ષ્મણૌ ભ્રાતરૌ નમસ્કૃત્વા સિતાસિતૌ ।
વને તસ્મિન્ વિચરન્તૌ સીતાં ચ જનકાત્મજામ્ ॥ ૧॥

શ્રીઃ ધન્યં મઙ્ગલ્યમાયુષ્યં અલક્ષ્મીકલિનાશનમ્ ।
રામાયણં પ્રવક્ષ્યામિ માતૃકાક્ષરયોજિતમ્ ॥ ૨॥

અ અયોધ્યાધિપતેઃ પુત્રાઃ ચત્વારસ્સૂર્યવર્ચસઃ ।
રામ-લક્ષ્મણ-શત્રુઘ્નાઃ ભરતશ્ચ મહાબલઃ ॥ ૩॥

આ આચારવિનયોપેતાઃ સત્યસન્ધા દૃઢવ્રતાઃ ।
શૂરાસ્સત્યપ્રતિજ્ઞાશ્ચ સર્વે દશરથાત્મજાઃ ॥ ૪॥

ઇ ઇઙ્ગિતેન તુ કૈકેય્યાઃ સ્વપુત્રહિતકામ્યયા ।
દૃઢવ્રતો રાજ્ઞ ઇષ્ટો રામસ્સંપ્રસ્થિતો વનમ્ ॥ ૫॥

ઈ ઓહિતેનાભિષેકેન રામસ્સંપ્રસ્થિતો વનમ્ ।
સીતા ચાનુગતા સાધ્વી લક્ષ્મણશ્ચ મહાબલઃ ॥ ૬॥

ઉ૧ ઉપવાસપરો રામઃ તપસ્વી દણ્ડકે વને ।
સભાર્યસ્સભ્રાતૃકશ્ચ ચચાર મુનિભિસ્સ્તુતઃ ॥ ૭॥

ઉ૨ ઊનશૂર્પણખાદોષાત્ રામસ્ય ચ પરાક્રમાત્ ।
તત્ર પારાભવઃ કાલો રાક્ષસાનામુપસ્થિતઃ ॥ ૮॥

ઉ૩ ઊનસ્તુ રામવીર્યેણ રાવણો નામ રાક્ષસઃ ।
તેન દુષ્ટાત્મના સીતા છલેનાપહતા વને ॥ ૯॥

ઋ ઋષિધર્મસમાયુક્તં મારીચં નામ માતુલમ્ ।
આગમ્ય રાવણઃ પાપઃ તતસ્તદ્વાક્યમબ્રવીત્ ॥ ૧૦॥

ૠ કૃતિં કૃત્વા છલેન ત્વં દૂરં ગચ્છ વનેષુ મે ।

દશરથાત્મજં હત્વાऽરામં તત્ર કરોમ્યહમ્ ॥ ૧૧॥

ऌ લોમ્ના કાઞ્ચનરૂપેણ મૃગો ભૂત્વા સ શૃઙ્ગલઃ ।
લોભયિત્વા તુ વૈદેહી વ્યહરદ્ દણ્ડકાવને ॥ ૧૨॥

ॡ સીતાં કમલપત્રાક્ષી ઉપાસીનાં વને તદા ।
ॡકારકુટિલો હત્વા રાવણોऽગાન્નભસ્તલમ્ ॥ ૧૩॥

એ એતસ્મિન્નન્તરે ગૃધ્રો જટાયુર્નામ ધાર્મિકઃ ।
તેન તાભ્યાં સમાખ્યાતં સીતાયાઃ પરિમાર્ગણે ॥ ૧૪॥

ઐ ઐશ્વર્ય-મદ-મત્તેન રાવણેન ખગાધિપમ્ ।
હત્વા તસ્મિન્ વને ગૃધં સીતા લઙ્કાં પ્રવેશિતા ॥ ૧૫॥

ઓ ઓઘશોકનિમગ્નસ્સઃ સીતાવત્સલરાઘવઃ ।
કપિના હીનરાજ્યેન સુગ્રીવેણ સમાગતઃ ॥ ૧૬॥

ઔ ઔષધં પરમં પ્રાપ્તઃ સુગ્રીવો રામદર્શનાત્ ।
હત્વા ચ વાલિનં રામઃ સુગ્રીવં ચાભ્યષેચયત્ ॥ ૧૭॥

અમ્ મહાકપિં હનૂમન્તં સત્યસન્ધં દૃઢવ્રતમ્ ।
સુગ્રીવઃ પ્રેષયામાસ સીતાયાઃ પરિમાર્ગણે ॥ ૧૮॥

અઃ હનૂમાન્ વાનરશ્રેષ્ઠો જામ્બવાન્ કૃતનિશ્ચયઃ ।
તારેયઃ કપિભિસ્સાર્ધં ભ્રમન્તો દક્ષિણાં દિશમ્ ॥ ૧૯॥

ક કથયન્તસ્સ્વવૃત્તાન્તં કુત્રચિત્ કાલપર્યયાત્ ।
અલબ્ધ્વાऽન્તશ્ચ વૈદેહીં ચક્રુઃ પ્રાયોપવેશનમ્ ॥ ૨૦॥

ખ ખગસ્તુ સિદ્ધકાર્યાર્થઃ સમ્પાતો નામ ધાર્મિકઃ ।
તેન તેષાં સમાખ્યાતં સીતાયાઃ પરિમાર્ગણે ॥ ૨૧॥

ગ ગત્વા પારં સમુદ્રસ્ય વેગેન ગરુડો યથા ।
દૃષ્ટ્વા લઙ્કાં ચ નગરીં સીતાં ચ જનકાત્મજામ્ ॥ ૨૨॥

ઘ ઘનેऽશોકવને દેશે સમાગત્ય સ મૈથિલીમ્ ।
હનૂમાન્ લબ્ધસન્દેશો રાક્ષસાન્ વિન્યસૂદયત્ ॥ ૨૩॥

ઙ ઙકારસદૃશીં કૃત્વા લલાટે ભૃકુટિં તથા ।
ક્રુદ્ધેનેન્દ્રજિતા ધીરો ગૃહીતો હનુમાન્ કપિઃ ॥ ૨૪॥

ચ ચન્દ્રમણ્ડલસઙ્કાશં લાઙ્ગુલં તસ્ય રાક્ષસાઃ ।
શુક્લૈરાવેષ્ટિતં વસ્ત્રૈઃ તૈલાભ્યઙ્ગમદીપયન્ ॥ ૨૫॥

છ છલયિત્વા તતસ્સર્વાન્ રાક્ષસાન્ વિપુલો હરિઃ ।
લાઙ્ગૂલેન પ્રદીપ્તેન લઙ્કામાદીપયત્ પુરીમ્ ॥ ૨૬॥

જ જલમધ્યે સ નિર્વાપ્ય લાઙ્ગૂલં પ્લવગેશ્વરઃ ।
કૃતામયં પુરં દગ્ધ્વા પુનરાગમનોત્સુકઃ ॥ ૨૭॥

ઝ ઝષાલયં સમુત્પ્લુત્ય હરિરુત્તમ આગતઃ ।
સિદ્ધકાર્યોઽતિત્વરિતઃ પ્રદેશં યત્ર રાઘવઃ ॥ ૨૮॥

ઞ ઞકારવદનો ભૂત્વા હનૂમાન્ સ હરીશ્વરઃ ।
ન્યવેદયદશેષેણ રાઘવાય મહાત્મને ॥ ૨૯॥

ટ ટકારસદૃશં ચાપં સશરં રઘુનન્દનઃ ।
ગૃહીત્વા પ્રસ્થિતસ્તૂર્ણં સીતાયાઃ પરિમાર્ગણે ॥ ૩૦॥

ઠ ઠકારાકારનેત્રાણાં હરીણામયુતવ્રતાઃ ।
સુગ્રીવસ્યાગ્રતો યાન્તિ પ્રીતાઃ કર્તવ્યલાલસાઃ ॥ ૩૧॥

ડ ડયન્ત ઇવ વેગેન ગત્વા પારં મહોદધેઃ ।
રાઘવશ્શરમુદ્યમ્ય પશ્ચાત્તત્રોપયાચિતઃ ॥ ૩૧॥

ઢ ઢકારસદૃશીં કૃત્વા લલાટે ભ્રુકુટીં તદા ।
હનુમાનગ્રતો યાતિ રાઘવસ્ય હિતે રતઃ ॥ ૩૩॥

ણ ણકારસદૃશૈઃ પદ્મૈઃ પ્રાઞ્જલિઃ પ્રત્યુપસ્થિતઃ ।
ઉવાચ સાગરો રામં સેતું મમ જલે કુરુ ॥ ૩૪॥

ત તસ્ય તદ્વચનં શ્રુત્વા સુગ્રીવો નળમબ્રવીત્ ।
નળ! ભદ્રં કુરુષ્વ ત્વં સેતું તત્ર મહાર્ણવે ॥ ૩૫॥

થ સ્થૂલં મૃષ્ટોપમં દિવ્યં વિશ્વકર્મસુતો નલઃ ।
ચકાર સેતું ધર્માત્મા સાગરે મકરાલયે ॥ ૩૬॥

દ દશયોજનવિસ્તીર્ણં આયતં શતયોજનમ્ ।
યેન વાનરસેનાઽગાત્ સમુત્પત્ય મહોદધિમ્ ॥ ૩૭॥

ધ ધનુર્વીર્યં સમાશ્રિત્ય રાઘવસ્સહ વાનરૈઃ ।
રાક્ષસાન્ યોધયામાસ ક્રોધસંરક્તલોચનઃ ॥ ૩૮॥

ન નગર્યાં મોઘયુદ્ધાયાં રાવણસ્સહ રાક્ષસૈઃ ।
તતો દ્વારાદ્ વિનિષ્ક્રમ્ય ચકારાયોધનં મહત્ ॥ ૩૯॥

પ પનસશ્શરભો મૈન્દો નીલો મારુતિરઙ્ગદઃ ।
નાનાવૃક્ષૈશ્શિલાભિશ્ચ રાક્ષસાન્ વિન્યસૂદયન્ ॥ ૪૦॥

ફ ફલિતૈઃ પાદપૈઃ કૂલે રોષિતાશ્શક્તિતોમરૈઃ ।
રાક્ષસાઃ ખણ્ડનં ચક્રુઃ વાનરાણાં ચમૂમુખે ॥ ૪૧॥

બ બલવાન્ રાઘવશ્શ્રીમાન્ દશગ્રીવં જઘાન સઃ ।
નિહતં રાવણં દૃષ્ટ્વા વિભીષણમથાબ્રવીત્ ॥ ૪૨॥

ભ ભક્તોઽસિ મયિ રક્ષેન્દ્ર! ધાર્મિકશ્ચાપિ સુવ્રતઃ ।
અરાક્ષસમિદં કર્મ કૃતં તુષ્ટોઽસ્મિ તે વિભો! ॥ ૪૩॥

મ મયા દત્તં રાજ્યમિદં ભુઙ્ક્ષ્વ પૂલસ્ત્યનન્દન !
સપુત્રભૃત્યાનુચરો ભુઙ્ક્ષ્વ રાજ્યમકણ્ટકમ્ ॥ ૪૪॥

ય યદર્થમયમારમ્ભઃ કૃતો મે રાક્ષસેશ્વર!
તામહં દ્રષ્ટુમિચ્છામિ ગચ્છ ત્વં સહલક્ષ્મણઃ ॥ ૪૫॥

ર રક્તઃ પ્રિયહિતે યુક્તો લક્ષ્મણેન વિભીષણઃ ।
આરોચયચ્ચ વૈદેહીં કાકુત્સ્થાય મહાત્મને ॥ ૪૬॥

લ લઙ્કાં પ્રવિશ્ય નગરી દદર્શ જનકાત્મજામ્ ।
કૃશાં વિવર્ણાં મલિનાં દર્શયામાસ સુપ્રિયામ્ ॥ ૪૭॥

વ વરારોહાં તદા દૃષ્ટ્વા રામશ્ચિન્તાસમન્વિતઃ ।
અગ્નૌ વિશુદ્ધામાદાય પુષ્પકેણ યયૌ તતઃ ॥ ૪૮॥

શ શત્રૂન્ હત્વાઽતિવેગેન પૂર્વમાગમ્ય રાઘવઃ ।
નન્દિગ્રામે સમાદાય ભરતં મિત્રવત્સલમ્ ॥ ૪૯॥

ષ ષાડ્ગણ્યસુગતિશ્શ્રીમાન્ રાઘવસ્સહ સીતયા । ષડ્ગુણસ્સુ
સઙ્ગતો ભ્રાતૃભિસ્સાર્ધં માતૃભિસ્સ સમાગતઃ ॥ ૫૦॥

સ સમેત્ય હૃષ્ટહૃદયઃ પૌરજાનપદૈસ્સહ ।
ગવાં શતસહસ્રાણિ બ્રાહ્મણેભ્યઃ પ્રદત્તવાન્ ॥ ૫૧॥

હ હતશત્રુર્મહેન્દ્રાણ્યા શતક્રતુરિવાપરઃ ।

શતં વર્ષસહસ્રાણાં રામો રાજ્યમવાસયત્ ॥ ૫૨॥

## અનુબન્ધઃ

ક્ષ ક્ષત્રં બ્રહ્માચ્યુતં જીયાત્ જીવનં જગતાં પરમ્ ।
જ્ઞાનાનન્દમયં જ્યોતિઃ ઈળે તન્માતૃકાક્ષરમ્ ॥ ૧॥

સપઞ્ચશતસાહસ્રસંવત્સરસનાતનમ્ ।
પ્રાઙ્માતૃકાક્ષરૈશ્શ્લોકૈઃ સાર્ધપઞ્ચાશતા સ્થિતમ્ ॥ ૨॥

બલિદ્વીપાન્તરે લબ્ધં જાનકીકવિનિર્મિતમ્ ।
રામેણ સંસ્કૃતં જીયાત્ શ્રીરામાયણમક્ષરમ્ ॥ ૩॥

ઇદં બરોડાનગરે રાજ્ઞા મુદ્રાપિતં પુરા ।
સ્વીકૃતં બાલબોધાર્થં બાલિદ્વીપપ્રબન્ધગમ્ ॥ ૪॥

નષ્ટવર્ણ-વિસંવાદં શમયન્ વર્ણસઙ્કરમ્ ।
ઊપ્લુતં ૡવિકારાન્કં અભેદં રલયોર્દિશન્ ॥ ૫॥

વ્યુદસ્યન્ ક્વચિદેવાત્ર શ્લોકલક્ષણભઞ્જનમ્ ।
ઓં શ્રીમદક્ષરં રામાયણમિત્યભિધાં દિશન્ ॥ ૬॥

પ્રથમાક્ષરયોગેન માતૃકાક્ષરયોજનાત્ ।
ષષ્ટિવર્ણપરીવર્તાત્ નવત્યક્ષરયોજનાત્ ॥ ૭॥

તત્ર તત્ર ચ સંરક્ષન્ સાભિપ્રાયં વચઃ કવેઃ ।
અષ્ટશ્લોકીં તતઃ કુર્વન્ રામસ્ સંસ્કૃતવાનિદમ્ ॥ ૮॥

ઇતીદં અનુબન્ધસહિતં બાલિદ્વીપપ્રસિધ્દં અક્ષરરામાયણં સમ્પૂર્ણમ્ ।

રોહિણી - પત્રિકા ॥ ૧૯૯૫-૯૬ દ્વીપાન્તરસંસ્કૃતવિજ્ઞાનં
સમ્પાદકઃ - પરિષ્કારકઃ - પ્રકાશકશ્ચ
અરૈયર્ શ્રીરામશર્મા,
ઉભયન્યાયવેદાન્તાલઙ્કારઃ
પઞ્ચભાષાકવિતાવલ્લભઃ
પ્રાંશુપાલઃ
સર્વકારીયસંસ્કૃતકાલેજઃ મેલુકોટે ।

Encoded and proofread by Surya Maruvada

*Akshara Ramayanam*

pdf was typeset on August 16, 2020

Please send corrections to *sanskrit@cheerful.com*